योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८४

चतुरशीतितमः सर्गः ८४

श्रीवसिष्ठ उवाच ।

इति निर्णीय स मुनिर्वीतहव्यो विवासनः ।

आसीत्समाधावचलो विन्ध्यकन्दरकोटरे ।। १

अपरिस्पन्दिताशेषसंविदानन्दसुन्दरः ।

बभावस्तंगतमनाः स्तिमिताम्भोधिशोभनः ।। २

अन्तरेव शशामास्य क्रमेण प्राणसंततिः ।

ज्वालाजालपरिस्पन्दो दग्धेन्धन इवानलः ।। ३

अनन्तर्निष्ठतां याते बाह्यार्थे चाप्यसंस्थिते ।

शेषेऽन्तर्लब्धसंस्थाने तस्यास्फुरितपक्ष्मणी ।। ४

घ्राणप्रान्तगताल्पाल्पसमालोके इवेक्षणे ।

अर्धकुड्मलितैः पद्मैः श्रियमाययतुः समाम् ।। ५

समकायशिरोग्रीवस्थानकः स महामतिः ।

आसीच्छैलादिवोत्कीर्णश्चित्रार्पित इवाथवा ।। ६

तथाभितिष्ठतस्तस्य संवत्सरशतत्रयम् ।

कोटरे विन्ध्यकच्छस्य ययावर्धमुहूर्तवत् ।। ७

एतावन्तमसौ कालं नाबुद्ध्यत किलात्मवान् ।

जीवन्मुक्ततया ध्यानी न च तत्याज तां तनुम् ।। ८

तावत्कालं स सुभगो न प्राबुध्यत योगवित् ।

उदारैरम्बुदारावैरासारभरघर्घरैः ।। ९

पर्यन्तमण्डलाधीशमृगयानतबृंहितैः ।

पक्षिवानरनिर्ह्रादैर्मातङ्गास्फोटनिःस्वनैः ।। १०

सिंहसंरम्भरटितैर्निर्झरारावसीत्कृतैः ।

विषमाशनिसंपातैर्जनकोलाहलैर्घनैः ।। ११

प्रमत्तशरभास्फोटैर्भूकम्पतटघट्टनैः ।

वनदाहधमध्वानैर्जलौघाहतिवल्गनैः ।। १२

महोपलतटाघातैर्धरणीतलमृज्जलैः ।

जलौघान्दोलनायातैस्तापैरनलकर्कशैः ।। १३

केवलं वहति स्वैरं काले गलितकारणम् ।

परियान्तीषु वर्षासु लहरीष्विव वारिणि ।। १४

स्वल्पेनैव हि कालेन तस्मिन्पर्वतकन्दरे ।

प्रावृडोघविनुन्नेन पङ्केनोर्वीतले कृतः ।। १५

तत्रासाववसद्भूमौकोटरे संकटोदरे ।

पङ्कसंपीडितस्कन्धः पर्वतेषु शिला यथा ।। १६

शतत्रये स वर्षाणामथ याते स्वयंप्रभुः ।

व्यबुध्यतात्मरूपात्मा धराकोटरपीडितः ।। १७

संविदेवास्य तं देहं जग्राहोर्वीनिपीडितम् ।

तनुः प्राणमयस्पन्दः प्राणसंसरणं विना ।। १८

उत्पत्तिप्रौढिमासाद्य कलना हृदयान्तरे ।

स्वमनोरूपिणी तस्य हृद्येवानुबभूव सा ।। १९

कैलासकानने कान्ते कदम्बस्य तरोस्तले ।

मुनित्वं शतमब्दानां जीवन्मुक्तात्मनिर्मलम् ।। २०

विद्याधरत्वं वर्षाणां शतमाधिविवर्जितम् ।

युगपञ्चकमिन्द्रत्वं प्रणतं सुरचारणैः ।। २१

श्रीराम उवाच ।

शक्रत्वादिषु तेष्वस्य प्रतिभासेषु भो मुने ।

नियमोऽनियमश्चैव दिक्कालनियतेः कथम् ।। २२

श्रीवसिष्ठ उवाच ।

सर्वात्मिकैषा चिच्छक्तिर्यत्रोदेति यथा यथा ।

तथा तत्राशु भवति तथात्मैकस्वभावतः ।। २३

यथा यत्र यदा बुद्धौ नियमः स तदा स्थितः ।

देशकालादिनियमक्रमाणां तन्मयात्मता ।। २४

तेन नानाविधान्येष जगन्ति परिदृष्टवान् ।

हृदि संवेदनाकाशे वीतहव्यो विवासनः ।। २५

सम्यग्बोधवतामेषा वासनैव न वासना ।

ज्ञानाग्निदग्धाऽदग्धस्य कैव बीजस्य बीजता ।। २६

कल्पमेकं गणत्वं स चन्द्रमौलेश्चकार ह ।

समस्तविद्यानिपुणं त्रिकालामलदर्शनम् ।। २७

यो यादृग्दृढसंस्कारः स तं पश्यति तादृशम् ।

जीवन्मुक्ततयैवैतद्वीतहव्योऽनुभूतवान् ।। २८

श्रीराम उवाच ।

एवं स्थिते मुनिश्रेष्ठ जीवन्मुक्तमतेरपि ।

बन्धमोक्षदृशः सन्ति वीतहव्यात्मनो यथा ।। २९

श्रीवसिष्ठ उवाच ।

यथास्थितमिदं विश्वं शान्तमाकाशनिर्मलम् ।

ब्रह्मैव जीवन्मुक्तानां बन्धमोक्षदृशः कुतः ।। ३०

एतत्संविन्नभो भाति यत्र यत्र यथा यथा ।

तत्र तत्र तथा तावत्तावत्तद्विन्दते ततम् ।। ३१

तेनानुभूतानि बहून्यनुभूयन्त एव च ।

जगन्ति सर्वात्मतया ब्रह्मरूपेण राघव ।। ३२

धराकोटरनिर्मग्नवीतहव्यचिदात्मसु ।

जगत्सु तेष्वसंख्येषु नीरूपेषु महात्मसु ।। ३३

यः शक्रोऽनवबुद्धात्मा सोऽद्य दीनेषु पार्थिवः ।

कर्तुं प्रवृत्तो मृगयां क्षणेऽस्मिन्नपि कानने ।। ३४

यो हंसोऽनवबुद्धात्मा पाद्मे पैतामहेऽभवत् ।

स्थितः स एव दाशेन्द्रः कैलासवनकुञ्जके ।। ३५

यो राजानवबुद्धात्मा भूमेः सौराष्ट्रमण्डले ।

स एषोऽद्य स्थितोऽन्ध्राणां ग्रामे बहुलपादपे ।। ३६

श्रीराम उवाच ।

मानसः किल सर्गोऽसौ वीतहव्यस्य तत्र ये ।

देहिनो भ्रान्तिपात्रं चेत्तद्देहाकारिणः कथम् ।। ३७

श्रीवसिष्ठ उवाच ।

यदि भ्रान्त्येकमात्रात्म वीतहव्यस्य तज्जगत् ।

तदिदं नाम ते राम किं भूयः परिभासते ।। ३८

इदमप्यङ्ग चिन्मात्रं मनोमात्रभ्रमोपमम् ।

तदपि व्योम चिन्मात्रं मनोमात्रं भ्रमोपमम् ।। ३९

वस्तुतस्तु न तद्राम जगन्नैवं न चेतरत् ।

तवापि न जगत्सत्ता ब्रह्मेदं भाति केवलम् ।। ४०

भावि भूतं भविष्यच्च यथेदं च तथेतरत् ।

जगत्सर्वमिदं दृश्यं संविन्मात्रमनोमयम् ।। ४१

एवंरूपमिदं यावन्न परिज्ञातमीदृशम् ।

वज्रसारदृढं तावज्ज्ञातं सत्परमाम्बरम् ।। ४२

अज्ञानान्मन एवेदमित्थं संप्रविजृम्भते ।

प्रत्युल्लासविलासाभ्यां जलमम्बुनिधाविव ।। ४३

यथास्थितेनैव चिदम्बरेण

स्वचित्तमेवैति मनोभिधानम् ।

स्फारं कृतं तेन जगच्च दृश्य-

मेवं ततं नैव ततं च किंचित् ।। ४४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे वीतहव्यमनोजगद्वर्णनं नाम

चतुरशीतितमः सर्गः ।। ८४